# .. Achamanopanishad ..

# ॥ आचमनोपनिषत् ॥

## Sanskrit Document Information

Text title : AchamanopaniShat

File name : AchamanopaniShat.itx

Category : upanishhat, vedanta

Location : doc_upanishhat

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : October 18, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

October 20, 2017

*sanskritdocuments.org*

ॐ आचमनविधिं व्याख्यास्यामः । जङ्घे पाणिपादौ प्रक्षाल्य प्राङ्मुख
उदङ्मुखो वा बद्धशिखो यज्ञोपवीती । ब्राह्मणस्य दक्षिणे हस्ते
पञ्च तीर्थानि भवन्ति अङ्गुल्यग्रे देवतीर्थं कनिष्ठिकामूले
आर्षिकं तीर्थं [अङ्गुष्ठतर्जन्योर्मध्ये] पैतृकं तीर्थं
अङ्गुष्ठमूले ब्रह्मतीर्थं मध्ये अग्नितीर्थम् । न तिष्ठन्न हसन् न
बुद्बुदैर्न च लोमैः गोकर्णाकृतिवत् कृत्वा माषमग्नजलं पिबेत् ।
तेन त्रिराचामेत् । प्रथमं यः पिबेदृग्वेदः प्रीणातु । द्वितीयं
यःपिबेद्यजुर्वेदः प्रीणातु । तृतीयं यः पिबेत् सामवेदः प्रीणातु ।
लोमाधरोष्ठमथर्ववेदः प्रीणातु । मुखमग्नितृप्तं सर्वं प्रोक्षति ।
यः पादो प्रोक्षति यश्चक्षुषी यश्चन्द्रमादित्यौ यन्नाभिं
तेन पृथिवी यस्ततस्तेन विष्णुः । यच्छिरस्तेन रुद्रः । मूर्ध्नि
शतकुबेरः । सर्वदेवत्यास्ते प्रीणन्तु । य एवं वेद । इत्युपनिषत् ॥

इत्याचमनोपनिषत् समाप्ता ।

Proofread by Sunder Hattangadi sunderh at hotmail.com

.. Achamanopanishad ..

Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996

on October 20, 2017

Please send corrections to *sanskrit@cheerful.com*